दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लद्वितीया
ज्येष्ठ 04 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-205 | 1 | मई 18, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 आरसीबी दलस्य गौरवपूर्णा विजयः, पंजाब किंग्स दलं पराजित्य प्ले-ऑफ मध्ये प्रवेशः

3 नीट-प्रश्नपत्रगोपनभङ्ग-प्रकरणे महत् प्रकटनम्: आरक्षित-प्रश्नपत्रमपि पूर्वमेव सारितम् अभवत्

5 स्वीडन देशेन प्रधानमन्त्री मोदी महोदयः 'रॉयल ऑर्डर ऑफ पोलर स्टार कमांडर ग्रैंड क्रॉस' सम्मानेन अलङ्कृतः

## मईमासस्य एकत्रिंशद्दिनाङ्के भविष्यति आकाशवाण्याः मन की बात कार्यक्रमः

प्रधानमन्त्री नरेन्द्रमोदी मईमासस्य एकत्रिंशद्दिनाङ्के आकाशवाण्याः मन की बात इति कार्यक्रमे देशविदेशस्थ जनैस्सह विचार-विनिमयं करिष्यति। इदं हि मासिकस्य रेडियोकार्यक्रमस्य चतुखिंशोत्तरैकशततमं संस्करणं भविष्यति। जनाः नमो ऐप इति चलदूरभाषीयतन्त्रांशे MyGov Open Forum इत्यत्र अथ च 1800-11-7800 अनेन दूरभाषसंख्या-माध्यमेन च कार्यक्रमस्य विषये स्वीयप्रतिक्रियां दातुं शक्नुवन्ति। आगामिसंस्करणाय परामर्शाः अस्य मासस्य एकोनत्रिंशत्-दिनाङ्कपर्यन्तं स्वीकृताः भविष्यन्ति।

भारत-होर्मज

## विश्व स्वास्थ्य संगठनेन इबोला-महामार्याः घोषणा कृता

विश्व स्वास्थ्य संगठनेन इबोला-महामार्याः घोषणा कृता। कांगो लोकतांत्रिक गणराज्य तथा युगांडा देशयोः प्रसृतं कोरोना-विषाणोः प्रकोपं अन्तर्राष्ट्रीयस्तरे सार्वजनिक-स्वास्थ्य-आपत्कालरूपेण घोषितम् अस्ति।विश्व स्वास्थ्य संगठनस्य महानिदेशकः टेड्रोस अधानोम घेब्रेयसस इत्यनेन त्रिशताधिक सन्दिग्ध-प्रकरणानां तथा अष्टाशीतिः मृत्यूनां विवरणानन्तरं एषः निर्णयः प्रदत्तः। डब्ल्यूएचओ संस्थया सामाजिक माध्यमेषु प्रकाशिते संदेशे स्पष्टतया उक्तम् यत् अयं प्रकोपः कोविड्-१९ इव वैश्विक महामारी-आपत्कालस्य श्रेण्यां न आगच्छति, तथा च अन्तर्राष्ट्रीय-सीमाः न निरोद्धव्याः इति परामर्शः अपि दत्तः। स्वास्थ्य अधिकारिभिः उक्तम् यत् अयं प्रकोपः इबोला-विषाणोः दुर्लभेन बंडीबुग्यो प्रभेदेन सम्बद्धः अस्ति, यस्य कृते अधुना किमपि स्वीकृतं उपचारः वा उपलब्धः नास्ति। इबोला रोगः शरीर-द्रव-संस्पर्शन प्रसारं करोति तथा च गम्भीरां प्रायः प्राणघातिनीं च व्याधिं जनयितुं शक्नोति।

## भारतदेशेन एकस्मिन् एव दिने २५६.४ गीगावाट परिमिता अभिलेखीय उच्च-विद्युत्-आवश्यकता सफलतया पूरिता




केन्द्रीय नवीकरणीय ऊर्जा-मन्त्री प्रल्हाद जोशी अवदत् यत् भारतदेशेन एकस्मिन् एव दिने २५६.४ गीगावाट परिमिता अभिलेखीय उच्च-विद्युत्-आवश्यकता सफलतया पूरिता। एकस्मिन् निजी-आङ्ग्ल-समाचारपत्रेण सह वार्तालापे श्रीजोशी महोदयः उक्तवान् यत् विद्युत्-आवश्यकतायाः प्रायः ३३ प्रतिशतं नवीकरणीय ऊर्जा-स्रोतैः पूरितम्।
तेन उक्तं यत् भारतस्य विद्युत्-संरचना अधुना अधिका सुदृढा भविष्याय च सज्जा अस्ति।मन्त्री अग्रे अपि उक्तवान् यत् एतत् परिवर्तनं ऊर्जा क्षमतायाः तीव्र-विस्तारं, वैद्युतिकीय सुदृढीकरणं, तथा च राष्ट्रस्य विकास-पथे स्वच्छ ऊर्जायाः वर्धमानं योगदानं प्रदर्शयति।

## प्रधानमन्त्री स्वीडनदेशस्य यात्रायां गोदेनबर्गनगरं प्राप्तवान्

भारतस्य प्रधानमन्त्री नरेन्द्रमोदी गोथेनबर्ग-नगरं प्राप्तवान्। नीदरलैण्डदेशस्य स्वीयां यात्रां समाप्य असौ गत सायंकाले स्वस्य पञ्चदेशानां यात्रायाः तृतीयचरणे स्वीडनदेशे संप्राप्तः । स्वीडनदेशस्य स्वीयायां द्विदिवसीययात्रायां श्रीमोदी अद्य स्वीडिश प्रधानमन्त्रिणा उल्फ क्रिस्टर्सनेन सह द्विपक्षीयवार्ता करिष्यति तथा द्विपक्षीयसम्बन्धानां सर्वेषां पक्षाणां समीक्षा अपि करिष्यति। उभयोः व्यापारः, हरितपरिवर्तनम्, कृत्रिमबुद्धिमत्ता, स्टार्टअप्स्, सुदृढ आपूर्तिशृङ्खलाः, रक्षा, अन्तरिक्षम्, जलवायुपरिवर्तनम्, जनसम्बन्धाश्च सहयोगस्य नूतनान् मार्गान् अन्वेष्टुं अपेक्षा वर्तते। पक्षयोः इत्यादिषु उभौ प्रधानमन्त्रिणौ उर्सुला फॉन डेर लेयेन इत्यनया यूरोपीय आयोगस्य अध्यक्षा सह मिलित्वा यूरोपीय उद्योग-गोलमेज सम्मेलनम् अपि सम्बोधयिष्यतः, यत् प्रमुखम् अखिल-यूरोपीय व्यापार-मञ्चम् अस्ति।



स्वस्य द्विदिवसीयायाः नीदरलैण्डदेशस्य यात्रायां प्रधानमन्त्री मोदी स्वस्य डच समकक्षीयेन सह द्विपक्षीयवार्ता कृतवान्। उभौ देशौ रक्षा-महत्त्वपूर्णखनिज तथा अन्येषु प्रमुखक्षेत्रेषु सहयोगं सुदृढीकर्तुं सप्तदश-संधि पत्राणि हस्ताक्षरितवन्तौ। उभौ नेतारी पश्चिम एशियादेशस्य स्थितेः तथा वैश्विक ऊर्जा-आपूर्ति-व्यापारस्य उपरि तस्य प्रभावस्य विषये गभीरां चिन्तां प्रकटितवन्तौ। सामाजिक-अंतर्जालीय-पटले लिखिते संदेशे श्रीमोदी उक्तवान् यत् नीदरलैण्डदेशस्य तस्य यात्रा द्विपक्षीयसम्बन्धान् नूतन स्तरे नेष्यति ।

## भारतस्य स्थायी प्रतिनिधिः पर्वथनेनी हरीशः उक्तवान् यत् होर्मुज-जलसंध्यां वाणिज्यिक नौकासु आक्रमणम् 'अस्वीकार्य' इति

होर्मुज-जलसंध्यां वाणिज्यिक नौकासु कृतं होर्मुज-आक्रमणम् 'अस्वीकार्य' इति कथयन् संयुक्तराष्ट्रसंघे भारतस्य स्थायी प्रतिनिधिः पर्वथनेनी हरीशः उक्तवान् यत् नागरिक-नौकाचालकानां लक्ष्यीकरणं तथा नौवहन स्वातन्त्र्यस्य बाधा केनापि प्रकारेण न्यायोचितं न भवितुमर्हति। सः वैश्विक ऊर्जा-आपूर्ति-प्रवाहस्य सुरक्षाविषये संयुक्तराष्ट्रस्य आर्थिक-सामाजिक परिषदः विशेष-सभायां भाषणं कुर्वन् आसीत्। श्रीहरीशस्य एषा टिप्पणी ओमान-तटस्य समीपे भारतीय-ध्वजयुक्तायां वाणिज्यिक नौकायां जातस्य आक्रमणस्य कतिपय दिनानन्तरम् आगता।

## सुभाषितम्

**लोभात्क्रोधः प्रभवति,**
**लोभात्कामः प्रजायते।**
**लोभान्मोहश्च नाशश्च,**
**लोभः पापस्य कारणम्॥**

भावार्थः- लोभ से क्रोध उत्पन्न होता है, लोभ से विषय भोग की इच्छा होती है और लोभ से मोह और नाश होता है, अतः लोभ ही सब पापों की जड़ है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## नेपालदेशीया पर्वतारोही कामी रीता शेरपा द्वात्रिंशत्-वारं माउण्ट् एवरेस्ट्-शिखरम् आरुह्य इतिहासः विरचितवती



नेपालदेशीया पर्वतारोही कामी रीता शेरपा इत्येषा द्वात्रिंशत्-वारं माउण्ट् एवरेस्ट्-शिखरम् आरुह्य इतिहासः विरचितवती। षट्पञ्चाशत्-वर्षीया एषा पर्वतारोही विश्वस्य उच्चतम-शिखरम् सर्वाधिकवारम् आरोहणस्य स्वकीयमेव कीर्तिमानं पुनः आरेखितवती।

# आरसीबी दलस्य गौरवपूर्णा विजयः, पंजाब किंग्स दलं पराजित्य प्ले-ऑफ मध्ये प्रवेशः




**धर्मशाला, १७ मई –** वेंकटेश अय्यर महोदयस्य (अविजितः ७३) तथा विराट कोहली महोदयस्य (५८) उत्कृष्ट-अर्धशतकाभ्याम्, धूमलवर्णटोपिका ( पर्पल कैप) धारकस्य भुवनेश्वर कुमारस्य (३८ धावनाङ्केषु द्वौ क्रीडकौ) तथा रसिख सलाम डारस्य (३६ धावनाङ्केषु त्रयः क्रीडकाः) घातककन्दुकक्षेपणनेन च रॉयल चैलेंजर्स बेंगलुरु (आरसीबी) दलेन रविवासरे आयोजितायां आईपीएल-प्रतिस्पर्धायां पंजाब किंग्स दलं २३ धावनाङ्कैः पराजित्य गौरवेण सह प्ले-ऑफ मध्ये स्थानं सुरक्षितं कृतम्। आरसीबी दलेन चतुर्णां क्रीडकानां क्षये २२२ धावनाङ्कानां सुदृढं लक्ष्यं निर्मितम्, यस्य प्रत्युत्तरे पंजाब दलस्य अष्टानां क्रीडकानां क्षये १९९ धावनाङ्केषु एव अवरुद्धा। अनेन विजयेन सह आरसीबी प्ले-ऑफ मध्ये स्थानं प्राप्नुवत् प्रथमं दलं अभवत्। १३ क्रीडासु आरसीबी दलस्य इयं नवमी विजयः अस्ति, तेन च शीर्षद्वयोः दलयोः स्वस्थानं प्रायः निश्चितं कृतम्। अपरपक्षे, निरन्तरं षष्ठवारं पराजयानन्तरं पंजाब दलं १३ क्रीडासु १३ अङ्कैः सह तालिकायां चतुर्थे स्थाने अस्ति।

प्ले-ऑफ मध्ये प्रवेशार्थं तस्मै स्वस्य अन्तिमक्रीडा सर्वथा जेतव्या भविष्यति, अन्यक्रीडानां च अनुकूलपरिणामस्य प्रतीक्षा करणीया भविष्यति।

लक्ष्यस्य अनुगमनं कुर्वतः पंजाब दलस्य कृते भुवनेश्वरः पावरप्ले मध्ये स्वस्य प्रारम्भिकयोः द्वयोः क्षेपणचक्रयोः एव उभौ प्रारम्भिकक्रीडकौ (ओपनर्स) प्रियांश आर्यं (०) प्रभसिमरन सिंहं (२) च बहिष्कृत्य तादृशं आघातं दत्तवान्, येन ते अन्तं यावत् सावरितुं न शक्नुवन्। अवशिष्टं कार्यं रसिख सलामडारः दलनायकः श्रेयस अय्यरं (१) बहिष्कृत्य पूर्णं कृतवान्। प्ले-ऑफ स्पर्धायां त्रीन् क्रीडकान् शीघ्रं त्यक्त्वा पंजाब दलं अन्तं यावत् सङ्घर्षं कुर्वत् एवातिष्ठत्। कूपर कॉनली ३७, सूर्यांश शेडगे ३५, मार्कस स्टॉयनिस ३७ तथा शशांक सिंहः ५६ धावनाङ्कान् अकुर्वन्, परन्तु एतत् पर्याप्तं नासीत्।

### अतीतवर्षस्य द्वयोः अन्तिमप्रतियोगिनोः द्वन्द्वम्

गतवर्षस्य द्वयोः अन्तिमप्रतियोगिनोः दलयोः अयं सम्मुखीना प्रतिस्पर्धा आसीत्, यत्र पुनः एकवारं आरसीबी दलेन विजयः प्राप्ता। पूर्वं विराट कोहली-वेंकटेश अय्यर द्वयोः उत्कृष्टक्रीडाभ्यां दलं सुदृढं धावनाङ्कं यावत् नीतम्। तदनन्तरं भुवी, हेजलवुड, रसिख इत्येतेषां कन्दुकक्षेपणनेन प्रारम्भ एव पंजाब दलं पश्चाद्भागे स्थलितम् (बैकफुट पर), प्रत्यागमनस्य च किमपि अवसरं न दत्तम्।

आईपीएल मध्ये पुनः एकः तादृशः दिवसः आसीत् यत्र पंजाब दलस्य कन्दुकक्षेपकाः २०० तः अधिकाः धावनाङ्काः दत्तवन्तः। जैकब बेथेल पुनः एकवारं न्यूनधावनाङ्के एव बहिर्भूतः अभवत्, परन्तु देवदत्त पडिक्कलस्य आक्रमक-४५ धावनाङ्कैः फलकक्रीडा पावरप्ले इत्यस्य अनन्तरं आरसीबी दलम् अग्रे नीतम्। अनेन कोहली महोदयाय क्रीडितुं सुअवसरः प्राप्तः, अस्मिन् अनुभवी क्रीडकेन स्वस्य ६७तमं आईपीएल अर्धशतकं पूर्णं कृतम्। विराटेन स्वस्य ३७ कन्दुकानां पार्यां चत्वारः चतुष्काः (चौके) त्रयः षटकाः (छक्के) च प्रहारिताः।रजत पाटीदारस्य अनुपस्थितौ, वेंकी अय्यर महोदयाय चतुर्थे स्थाने क्रीडितुं सुअवसरः प्राप्तः, तेन च निराशं न कृतम्; ४० कन्दुकैः अष्टचतुष्काणां चतुर्षटकानां च साहाय्येन तेन अविजिताः ७३ धावनाङ्काः निर्मिताः। टिम डेविड महोदयस्य आक्रमक-कैमियो पार्या एतत् निश्चितं कृतं यत् आरसीबी २२० सङ्ख्यां पारं कुर्यात्, येन एषा क्रीडा सुदृढा अभवत्। डेविडः १२ कन्दुकैः द्वौ चतुष्कौ द्वौ षटकौ च प्रहारितवान्। देवदत्त पडिक्कलः ४५ तथा टिम डेविडः २८ धावनाङ्कानां योगदानं दत्तवन्तौ। पंजाब पक्षतः हरप्रीतस्य प्रत्यागमनं बहु समीचीनं आसीत्, तेन द्वौ महत्त्वपूर्णौ क्रीडकौ निष्कासितौ, परन्तु अन्ये कन्दुकक्षेपकाः प्रभूतान् धावनाङ्कान् दत्तवन्तः।

## त्रिवेन्द्रम्-न्यूदिल्ली-राजधानी एक्सप्रेस-रेलयानस्य पृष्ठभागे अग्निप्रकोपः



हिमसंस्कृतवार्ता। त्रिवेन्द्रम्-न्यूदिल्ली-राजधानी एक्सप्रेस-रेलयानस्य पृष्ठभागे जातस्य अग्नि-काण्डस्य उच्च-स्तरीयान्वेषणस्य आदेशः रेलमन्त्रालयेन प्रदत्तम्। गत प्रातः प्रायः सपाद पञ्चवादने, कोटा-सम्भागस्य नागडा क्षेत्रस्य समीपे त्रिवेन्द्रम्-न्यूदिल्ली-राजधानी इत्यत्र एकः गाई-कोचः, एकः ए. सी.-3 टियर् इत्येतयोः द्वयोः अग्निप्रकोपः अभवत्। मन्त्रालयः अवदत् यत्, कोच-मध्ये सुरक्षा-व्यवस्थया तत्क्षणमेव कार्यं कृतम्, रेलयानं च स्वयमेव स्थगितम्। रेल-चालकदलेन तत्क्षणमेव प्रभाविती उभौ कोचौ पृथक् कृतम्, तथा च अस्यां घटनायां यात्रिणः क्षतेः कापि सूचना न अस्ति।

## राष्ट्रपतिः द्रौपदी मुर्मु महोदया २५ मई दिनाङ्के वर्षे २०२६ तमवर्षस्य पद्मपुरस्कारान् प्रदास्यति




**नवदेहली:** राष्ट्रपतिः द्रौपदी मुर्मु महोदया २०२६ तमवर्षस्य पद्मपुरस्कारान् आगामी-मई-मासस्य २५ दिनाङ्के वितरिष्यति। गृहन्त्रालयेन सामाजिक-माध्यमस्य (सोशल मीडिया) एकस्यां टिप्पण्यां सूचितं यत् राष्ट्रपतिभवने आयोज्यमाने प्रथमे नागरिक-अलङ्करण-समारोहे राष्ट्रपतिः पद्मविभूषण, पद्मभूषण, पद्मश्री पुरस्कारान् च प्रदास्यति। अस्मिन् वर्षे भारतसर्वकारेण आहत्य १३१ पद्मपुरस्काराणां घोषणा कृता अस्ति। एतेषु पञ्च पद्मविभूषण, १३ पद्मभूषण तथा ११३ पद्मश्री पुरस्काराः सम्मिलिताः सन्ति। पुरस्कारप्राप्तृषु १९ महिलाः सन्ति, यदा च १६ जनेभ्यः मरणोपरान्तं अयं सम्मानः प्रदास्यते।पद्मविभूषणः, पद्मभूषणः, पद्मश्रीश्च देशस्य सर्वोच्चनागरिकसम्मानेषु अन्यतमाः सन्ति। एतेषां पुरस्काराणां प्रारम्भः १९५४ तमे वर्षे अभवत् तथा च प्रतिवर्षं गणतन्त्रदिवसस्य अवसरे एतेषां घोषणा क्रियते।

एते पुरस्काराः कला, साहित्यम्, शिक्षा, क्रीडा, चिकित्सा, समाजसेवा, विज्ञानं तथा अभियान्त्रिकी (इंजीनियरिंग), जनसेवा, व्यापारः उद्योगश्च इत्यादिषु विभिन्नक्षेत्रेषु उत्कृष्टाय विशिष्टाय च सम्पादितयोगदानाय प्रदीयन्ते।

## वन्देमातरम् विवादितं गीतम्, इदानीं इस्लाम-धर्मः लक्ष्यीकृतः- जमीयत उलेमा-ए-हिंद



जमीयत उलेमा-ए-हिंद इति सङ्गटनेन पुनः एकवारं वन्देमातरम् विवादितं गीतं कथयित्वा सर्वकारस्य अधिसूचनायाः उपरि प्रश्नाः उत्थापिताः। सङ्गठनस्य अध्यक्षः मौलाना अरशद मदनी कार्यसमित्याः उपवेशनस्य (बैठक) अनन्तरं अवदत् यत् एकस्याः अधिसूचनायाः माध्यमेन वन्देमातरम् सदृशाय विवादितगीताय राष्ट्रियगीतस्य पदवीं दत्ता अस्ति, भाजपा-शासितेषु राज्येषु च अस्य प्रतिदिनं गानं अनिवार्यं क्रियमाणं वर्तते। मौलाना मदनी आरोपं कृतवान् यत् अपरपक्षे मस्जिदान्, मक़बरान्, मदरसांश्च अवैधं मत्वा भूमिशायिनं (पातितं) क्रियमाणं अस्ति तथा च मदरसानां विरुद्धं निरन्तरं नवीनाः आदेशाः निर्गम्यन्ते, ते शैक्षणिकसंस्थानानि न भूत्वा कश्चित् अवैधगतिविधीनां केन्द्राणि स्युः। सः अवदत् यत् पूर्वं मुसलमानाः सर्वकारस्य लक्ष्ये (निशाने) आसन्, परन्तु इदानीं साक्षात् इस्लाम-धर्मः एव लक्ष्यीकृतः अस्ति।

# नीट-प्रश्नपत्रगोपनभङ्गप्रकरणे महत् प्रकटनम्: आरक्षित-प्रश्नपत्रमपि पूर्वमेव सारितम् अभवत्




**हिमसंस्कृतवार्ता।** नीट (NEET) प्रश्नपत्रगोपनभङ्गप्रकरणे (पेपर लीक) एकं महत् प्रकटनं सञ्जातम्। केन्द्रीय-अन्वेषण-ब्यूरो (CBI) इत्यस्य अन्वेषणेन ज्ञातं यत् नीट-परीक्षायाः केवलम् एकम् एव प्रश्नपत्रं सारितं (लीक) न अभवत्, अपितु द्वयोः अपि समुच्चययोः (sets) प्रश्नपत्राणि सारितानि आसन्। द्वितीयः समुच्चयः आरक्षितरूपेण (reserve) सुरक्षितः स्थापितः आसीत्, परन्तु अन्वेषणकाले संज्ञानं जातं यत् द्वितीयसमुच्चयस्य प्रश्नाः अपि अनुमित-प्रश्नपत्रस्य (guess paper) प्रश्नैः सह सर्वथा मिलन्ति। नीट-प्रश्नपत्रगोपनभङ्गस्य मुख्यसूत्रधाराः (किंगपिन) सहायक-प्राध्यापकः पी.वी. कुलकर्णी, वरिष्ठा शिक्षिका मनीषा गुरुनाथ मांधरे, मनीषा वाघमारे च इति मन्स्यन्ते, एतेषाम् एव नामानि सम्मुखम् आगतानि सन्ति।

वस्तुतः, प्रतिवर्षं राष्ट्रिय-परीक्षण-अभिकरणेन (NTA) नीट-यूजी (NEET-UG) परीक्षायाः कृते प्रश्नपत्राणां द्वौ समुच्चयौ सज्जयेते। तयोः कतरः समुच्चयः परीक्षायां प्रदास्यते इति विषयः महानिदेशकं (Director General) विहाय अन्यस्मै कस्मैपि न ज्ञायते। एकः समुच्चयः मुख्यपरीक्षायाः कृते भवति, द्वितीयश्च आरक्षितरूपेण स्थाप्यते, येन यदि कुत्रचित् कापि त्रुटिः विसङ्गतिर्वा भवेत् तर्हि आवश्यकतानुगुणं सद्यः एव द्वितीयेन प्रश्नपत्रेण परीक्षा सञ्चालयितुं शक्येत्। साम्प्रतम् इदं स्पष्टं जातं यत् तद् आरक्षितं प्रश्नपत्रमपि पूर्वमेव बहिर्गतं (आउट) अभवत्। प्राप्तसूचनानुसारम्, यत् प्रश्नपत्रं मई-मासस्य तृतीये दिनाङ्के परीक्षायाम् आगतं तथा च यत् प्रश्नपत्रम् आरक्षितरूपेण स्थापितम् आसीत्, तयोः द्वयोः अपि जीवविज्ञान-रसायनशास्त्रयोः (Biology & Chemistry) सर्वे प्रश्नाः अनुमित-प्रश्नपत्रे (गेस पेपर) पूर्वमेव समाविष्टाः आसन्। अन्वेषणेन प्रकाशितं यत् प्राध्यापकः पी.वी. कुलकर्णी वरिष्ठा शिक्षिका मनीषा मांधरे च मिलित्वा एकम् अनुमित-प्रश्नपत्रं रचितवन्तौ, यत् अनेकेषु राज्येषु लक्षशः रूप्यकेषु विक्रीतम्। अस्मिन् जीवविज्ञानस्य १८० तथा रसायनशास्त्रस्य ९० प्रश्नाः तादृशाः प्राप्ताः, ये एनटीए (NTA) संस्थायाः द्वयोः अपि नीट-समुच्चययोः प्रश्नैः सह साम्यं भजन्ति। तयोः यत् प्रश्नपत्रं मुख्यपरीक्षायाम् आगतं, तस्मिन् जीवविज्ञानस्य ९० तथा रसायनशास्त्रस्य ४५ प्रश्नाः, अर्थात् अर्धांशः प्रश्नाः प्रश्नकोषे (क्वेश्चन बैंक) यथावत् लिखिताः सन्ति। इदमपि ज्ञातं यत् प्राध्यापकः पी.वी. कुलकर्णी वरिष्ठा शिक्षिका मनीषा मांधरे च जीवविज्ञानस्य प्रश्नान् एनटीए-संस्थायाः चौर्येण प्राप्तवन्तौ। एतदतिरिच्य सीबीआई-संस्थया भौतिकशास्त्रस्य (Physics) केषाञ्चन प्रश्नानाम् अपि सारणस्य (लीक होन के) साक्ष्याणि प्राप्तानि। एतौ द्वौ अपि नीट-प्रश्नपत्रनिर्मातृणाम् विशेषज्ञ-मण्डलस्य (expert panel) सदस्यौ आस्ताम्। उभौ अपि प्रश्नान् हस्तेन लेखितवन्तौ तथा च 'अनुमित-प्रश्नपत्रम्' इति नाम दत्त्वा तस्य विक्रयणं कृतवन्तौ। अस्मिन् प्रपञ्चे मनीषा वाघमारे मध्यस्थरूपेण (एजेंट) एतत् अनुमित-प्रश्नपत्रं विक्रीतवती।

## १५६ सीबीएसई-विद्यालयेषु त्रयाणां संकायानां प्रारम्भाय प्रक्रिया अन्तिमचरणे

**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खुमहोदयस्य निर्देशानुसारं शिक्षाविभागः राज्यस्य सीबीएसई मण्डलेन सम्बद्धेषु १५६ नूतनविद्यालयेषु कला- विज्ञान- वाणिज्यानाम् इति त्रयाणाम् अपि संकायानां प्रारम्भाय प्रक्रियां अन्तिमचरणं प्रति नीतवान् अस्ति। मुख्यमन्त्रिणा अचिरमेव शिक्षाविभागात् विस्तृतं प्रतिवेदनं याचितम् आसीत्, यस्मिन् ज्ञातं यत् १५६ विद्यालयेषु १८ विद्यालयेषु सम्प्रति त्रयः अपि संकायाः उपलब्धाः नासन्। तेन विभागः आदिष्टः यत् सर्वेषु सीबीएसई- सम्बद्धेषु विद्यालयेषु छात्रेभ्यः सर्वेषां विषयाणां विकल्पाः उपलब्धाः कारयितव्याः।

चिह्नितेषु विद्यालयेषु राजकीय- वरिष्ठ- माध्यमिक- विद्यालय- किहाड़, बाड़ा, बड़सर, बतरान, सोहारी, चढ़ियार, कुंसल, लोहारली, सलेटी, कोलनी ढलवान, अपर लंबागांव, निचार, सराहन (कुल्लू), बलदेयां, सैंज, ननखड़ी, कफोटा तथा बधेड़ा इत्यादयः सम्मिलिताः सन्ति। एतेषु विद्यालयेषु वाणिज्य- संकायः, विज्ञान- संकायश्च उपलब्धः नासीत्। शैक्षणिक-संरचनां सुदृढीकर्तुं छात्रेभ्यः च शिक्षायाः अवसरान् वर्धयितुं उद्देश्येन अधुना एतेषु सर्वेषु विद्यालयेषु अस्मादेव शैक्षणिकसत्रात् विज्ञान- वाणिज्य-संकायाः आरप्स्यन्ते।मुख्यमन्त्रिणः निर्देशेषु त्वरितकार्यान्वयनं कुर्वता शिक्षाविभागेण एतान् संकायान् सुचारुरूपेण प्रभाविरूपेण च प्रारब्धुं सर्वाः आवश्यकाः प्रक्रियाः औपचारिकताश्च आरब्धाः। अस्मिन् विषये विस्तृता अधिसूचना शीघ्रमेव निर्गमिष्यति। तेन उक्तं यत् अस्य उपक्रमस्य उद्देश्यं विशेषतः ग्रामीणक्षेत्राणां छात्रेभ्यः गुणात्मिकायाः व्यापकशिक्षायाः अवसरान् प्रदातुम् अस्ति। राज्यसर्वकारः पूर्वमेव १५६ विद्यालयान् सीबीएसई- प्रारूपेण सञ्चालयितुं स्वीकृतिं दत्तवान् अस्ति। एतत् हिमाचलप्रदेशे शिक्षाव्यवस्थायाः सुदृढीकरणाय व्यापकं प्रतिबद्धतां दर्शयति।

सुखविन्दरसिंहसुक्खुना शिक्षाविभागः एतदपि आदिष्टः यत् एतासु संस्थासु आवश्यकानां शिक्षकाणां अन्यकर्मचारिणां च उपलब्धता निश्चिता करणीया, येन छात्रेभ्यः उत्कृष्टे शैक्षणिक- वातावरणे गुणात्मिका शिक्षा मिलितुं शक्नुयात्। राज्यसर्वकारस्य १५६ सीबीएसई-विद्यालयानां सञ्चालनस्य निर्णयं प्रति उत्साहजनकः प्रतिभावः प्राप्तः, छात्र-नामाङ्कने च उल्लेखनीया वृद्धिः पञ्जीकृता। एते सीबीएसई- विद्यालयाः छात्राणां समग्रविकासाय केन्द्रितां गुणात्मिकां शिक्षां सुनिश्चितां करिष्यन्ति, यत्र अध्ययनेन सह क्रीडा, सङ्गीतं, कला च सदृशीनां सह- पाठ्यक्रम- प्रवृत्तीनाम् उपरि अपि समानं बलं दीयते।

## हिमाचलप्रदेशे यैः त्रयः अनिवार्याः विषयाः उत्तीर्णाः, ते एव द्वितीयां परीक्षाम् दातुं शक्ष्यन्ति; विद्यालय-शिक्षा-मण्डलेन पात्रता निर्धारिता



हिमसंस्कृतवार्ताः- धर्मशाला।हिमाचलप्रदेश-विद्यालय- शिक्षाबोर्ड इत्यनेन द्वैपरीक्षा- प्रणाल्याः अन्तर्गतं अस्य मासस्य अन्ते तथा जून-मासे आयोज्यमानायाः दशम-कक्षायाः द्वितीय-परीक्षायाः पात्रता निर्धारिता। बोर्डेन उक्तं यत् "आवश्यक-सुधार-श्रेणी" अन्तर्गतं ते एव छात्राः परीक्षायाम् उपवेष्टुम् अर्हन्ति, ये पञ्चसु अनिवार्यविषयेषु- आङ्ग्लभाषा, गणितम्, हिन्दी, सामाजिकविज्ञानम्, विज्ञानम्- एतेषु त्रिषु विषयेषु उत्तीर्णाः सन्ति। यदि छात्रः द्वितीयपरीक्षायां उभयोः अनिवार्यविषययोः उत्तीर्णः भवति, तर्हि सः उत्तीर्णः घोषितः भविष्यति। यदि कश्चन छात्रः केवलम् एकस्मिन् विषये उत्तीर्णः भवति, तर्हि सः "कम्पार्टमेण्ट- श्रेणी" अन्तर्गतं स्थापितः भविष्यति।उभयोः विषययोः अनुत्तीर्णत्वे ते "अनिवार्य- पुनरावृत्ति- श्रेणी" अन्तर्गतं स्थापयिष्यन्ते। एतदतिरिक्तम्, एते छात्राः पूर्वम् उत्तीर्णेषु त्रिषु विषयेषु कस्यचित् एकस्य विषयस्य सुधार-परीक्षां दातुमपि पात्राः भविष्यन्ति। बोर्डस्य अध्यक्षः डॉ . राजेशशर्मा अवदत् यत् "वैकल्पिक-सुधारश्रेणी" तेषां छात्राणां कृते भविष्यति, ये सर्वेषु अनिवार्यविषयेषु उत्तीर्णाः सन्ति, किन्तु स्वाङ्केषु सुधारम् इच्छन्ति। एतेषां छात्राणां कृते पञ्चसु अनिवार्यविषयेषु अधिकतमं त्रिषु विषयेषु सुधार-परीक्षां दातुं अनुमतिः भविष्यति। येषां छात्राणां प्रथम- परीक्षाफलं "कम्पार्टमेण्ट" अस्ति, ते "कम्पार्टमेण्ट- श्रेणी" अन्तर्गतं द्वितीयपरीक्षायाम् उपवेष्टुम् अनुमतिं प्राप्स्यन्ति।

# राजकीयसंस्कृतशिक्षकपरिषदा सेवानिवृत्तिपूर्वं कृतं संस्कृत शिक्षकाणां सुसम्मानम्



**हिमसंस्कृतवार्ताः- शिवाशर्मा**

राजकीयसंस्कृतशिक्षक-परिषदः बिलासपुरम् सुन्हाणीत्यस्मिन् स्थाने जिलाध्यक्षस्य डॉ. अशोककुमारस्य अध्यक्षतायां सेवानिवृत्तिपूर्वं संस्कृतशिक्षकाणां सम्मानसमारोहं समायोजितवान्। अस्मिन् समारोहे सेवानिवृत्तिं प्रति गच्छन्तः आदरणीयाः धनीरामशास्त्री-महोदयः, भागसिंहशास्त्री- महोदयः, सदानन्दशास्त्री- महोदयश्च संस्कृतशिक्षाक्षेत्रे स्वकीयेन उत्कृष्टेन प्रशंसनीयेन च योगदानेन विशेषरूपेण सुसम्मानिताः। एते शिक्षकाः परिषदा स्मृतिचिह्नैः हिमाचलीयशिरस्त्राणेन च सम्मानिताः। कार्यक्रमे राजकीय- संस्कृतशिक्षक- परिषदः बिलासपुर- जिलाध्यक्षः डॉ. अशोककुमारः, वरिष्ठोपाध्यक्षः राकेशकुमारः, महासचिवः सौरभशर्मा, वित्तसचिवः प्यारेलालः, संगठनमन्त्री भूपेन्द्रसिंहः, झण्डूत्ता- खण्डाध्यक्षः मनोजकुमारः, महासचिवः अजयगौतमः, सन्दीपशास्त्री, अनन्तरामशास्त्री, रामलालः इत्यादयः गणमान्याः चोपस्थिताः आसन्।

# HP Municipal Election- मतदानाय यूनां आरभ्य वृद्धानां यावत् उत्साहः, १०७ वर्षीयः प्यारसिंहः अपि मतं दत्तवान्



**हिमसंस्कृतवार्ताः-** कार्यालयीयः प्रतिनिधिः।हिमाचलप्रदेशे रविवासरे चतुर्षु नगरनिगमेषु ५१ नगर-निकायेषु च जातं मतदानं प्रति जनेषु महती प्रसन्नता उत्साहश्च दृष्टः। प्रातःकालादेव मतदानकेन्द्रेषु मतदातॄणां दीर्घाः पङ्क्तयः आसन्। युनः, महिलाः, वृद्धाश्च मतदाने उत्साहेन भागं गृहीतवन्तः। प्रातः ७:०० वादनतः अपराह्ले ३:०० वादनं यावत् प्रदेशस्य चतुर्षु नगरनिगमेषु ५१ नगरीय- निकायेषु च ५८९ मतदानकेन्द्रेषु मतदानप्रक्रिया प्रचलति स्म। मतदातारः अवदन् यत् लोकतन्त्रं सुदृढीकर्तुं मतदानं करणीयम् इति प्रत्येकस्य नागरिकस्य कर्तव्यं वर्तते, तैः च स्वकर्तव्यं पालितम्। मतदाने लोकतन्त्रस्य अत्यन्तं भावपूर्णा प्रेरणादायिनी च छविः दृश्या अभवत्। तरुण-मतदातॄणाम् उत्साहस्य मध्ये शतवर्षादपि अधिक-वयस्कानां वृद्धानां धैर्येण सर्वेषाम् अवधानम् आकृष्टम्। बहवः वृद्धाः यष्टिणां (लाठी) साहाय्येन, केचन च 'व्हीलचेयर' (आसन्दिका) इत्यस्याः स्वपरिजनानां च साहाय्येन मतदानकेन्द्राणि प्राप्य स्वमताधिकारस्य प्रयोगं कृतवन्तः। न केवलं वृद्धाः, अपि तु दिव्याङ्गाः, दृष्टिबाधिताः, गन्तुम् असमर्थाः मतदातारः अपि मतदानं प्रति स्वकीयम् उत्तरदायित्वं प्रदर्शितवन्तः। मतदानकेन्द्रेषु प्राप्तानाम् एतेषां मतदातॄणाम् उत्साहं दृष्ट्वा मतदान-कर्मचारिणः सुरक्षाकर्मिणश्च अपि भावुकतामन्वभवन्।

नगरपरिषद-चम्बा-अन्तर्गतस्य हटनाला-वार्डस्य १०७ वर्षीयः प्यारसिंहः स्वमताधिकारस्य प्रयोगं कृतवान्। अस्मिन् अवसरे तस्य परिजनाः अपि तेन सह आसन्। प्यारसिंहः हटनाला-वार्डस्य 'पुराना कॉलेज' इति मतदानकेन्द्रे मतं दत्तवान्। सः सर्वान् जनान् आहूतवान् यत् लोकतन्त्रं सुदृढीकर्तुं प्रत्येकं जनेन मतदानं अवश्यं करणीयम्। तथैव, नगरपरिषद- घुमारवीं- अन्तर्गतस्य कल्याणा- वार्डस्य १०४ वर्षीया फुलमूदेवी अपि मतदानं कृत्वा लोकतन्त्रं प्रति स्वश्रद्धां प्रादर्शयत्। परिजनानां सहयोगेन मतदानकेन्द्रं प्राप्तायाः फुलमूदेव्याः अधिकारिभिः, कर्मचारिभिः, स्थानीयजनैश्च स्वागतं कृतं तस्याः साहसस्य प्रशंसा च कृता। मतदानानन्तरं सा अवदत् यत् प्रत्येकं नागरिकेण स्वमतस्य उपयोगः अवश्यं करणीयः। प्रशासनेन अपि तस्याः मतदानं लोकतान्त्रिक- व्यवस्थां प्रति जागरूकतायाः उत्तरदायित्वस्य च प्रतीकत्वेन वर्णितम्। चिड़गांव- नगरपञ्चायत- अन्तर्गता १०० वर्षादपि अधिकवयस्का कौलदासी अपि मतं दातुं मतदानकेन्द्रं प्राप्ता। परिजनाः तां मतदानकेन्द्रं प्रति अनयन्। वयसः अस्मिन् प्रान्ते अपि मतदानं प्रति तस्याः उत्साहं दृष्ट्वा जनाः तस्याः धैर्यं वर्धितवन्तः, लोकतन्त्रस्य अस्मिन् महोत्सवे तस्याः सहभागितां प्रेरणादायिनीं च अवदन्।

## मतं दातुं गच्छतः वृद्धस्य हृदयाघातेन मृत्युः

अन्यतः, चम्बा-नगरस्य चोंतड़ा-वार्ड-जनसाली क्षेत्रे ७५ वर्षीयस्य वृद्धस्य अञ्जनशर्मणः हृदयाघातेन मृत्युः अभवत्। एषः वृद्धः नगरपरिषद- निर्वाचनाय जनसाली-मतदानकेन्द्रे मतं दातुं गच्छन् आसीत्। जिला- निर्वाचन- अधिकारी मुकेश रेप्सवालः न्यगादीत् यत् एषा महती दुःखदघटना संवृत्ता।

## प्रशासनेन दिव्याङ्ग-मतदातॄणां कृते न प्रदत्ता सुविधा, स्वयं मतदानकेन्द्रं प्राप्ताः

निर्वाचन- आयोगेन प्रशासनेन च दिव्याङ्ग- मतदातॄणां कृते कापि सुविधा न कृता आसीत्। ईदृश्यां स्थितौ तैः स्वयं मतं दातुं मतदानकेन्द्रं प्राप्तव्यम् अभवत्। सोलननगरे दिव्याङ्ग- मतदातारः 'व्हीलचेयर' आधारेण मतदानकेन्द्रं प्राप्ताः।

## मण्डी-नगरे विधायकेन अनिलशर्मणा, डीसी- अपूर्वदेवगनेन च कृतं मतदानम्

मण्डी-नगरनिगम-निर्वाचनाय सदर-विधायकेन अनिलशर्मणा सह उपायुक्तेन मण्डी-क्षेत्रस्य अपूर्वदेवगनेन अन्यैश्च मतदानं कृतम्। मतदानानन्तरं विधायकः अनिलशर्मा मतदानकेन्द्राणां निरीक्षणं कृतवान्। लोकतन्त्रस्य अस्मिन् महापर्वणि सहभागित्वं निर्वहता मण्डी- उपायुक्तेन अपूर्वदेवगनेन खलियार-वार्ड क्षेत्रे स्वपरिवारेण सह मतदानं कृतम्। सः सर्वान् मतदातॄन् स्वमताधिकारस्य प्रयोगार्थम् प्रार्थयत्।

## ईवीएम (EVM) यन्त्रं विकृतं, समखेतर-क्षेत्रे ४० निमेषाणां विलम्बेन आरब्धं मतदानम्

नगरनिगम-मण्डी-निर्वाचनस्य अन्तर्गतं समखेतर-वार्ड- सङ्ख्या ११ इत्यस्य मतदानकेन्द्रे ३ मध्ये 'ईवीएम' यन्त्रस्य विकृतत्वात् मतदानं प्रायः ४० निमेषाणां विलम्बेन आरब्धम्। प्रातः ७ वादने मतदानं प्रारब्धव्यम् आसीत्, किन्तु यन्त्रस्य दोषकारणात् एषा प्रक्रिया ७:४० वादने प्रारब्धा। अस्मिन् अन्तराले मतदानकेन्द्रस्य बहिः जनेभ्यः दीर्घाः पङ्क्तयः सञ्जाताः। सदर-एसडीएम रूपिन्द्रकौरः घटनास्थलं प्राप्य यन्त्रस्य संशोधनं यावत् तत्रैव उपस्थिता आसीत्। प्रथमं मतं मुरारीशर्मणा दत्तम्। नगरनिगम-मण्डी-क्षेत्रस्य अनेकेषु केन्द्रेषु प्रत्याशिनः निश्चित-सीमाभ्यन्तरं एव प्रचारसामग्रीं पीठ-आसन्दिकाश्च स्थापितवन्तः आसन्, याः निष्कासिताः। गान्धीचौक- तल्याहड़- केन्द्रेषु प्रचारसामग्री-स्थापनविषये प्रत्याशिनां कर्मचारिणां च मध्ये वादविवादोऽपि सञ्जातः।

## नगरपरिषद- जोगिन्द्रनगर- निर्वाचनम्- पतिः अजयः पराजितः, पत्नी चन्द्ररेखा विजिता

जोगिन्द्रनगर-नगरपरिषद-निर्वाचने अस्मिन् वारे एकस्यैव परिवारस्य द्वौ सदस्यौ निर्वाचनक्षेत्रे स्वभाग्यं परीक्षितवन्तौ। निर्वाचनपरिणामे पत्न्याः चन्द्ररेखायाः विजयः अभवत्, यदा तु पत्युः अजस्य पराजयः जातः। दम्पत्योः निर्वाचनप्रतिस्पर्धां प्रति सम्पूर्णे क्षेत्रे चर्चा प्रचलति स्म। नगरपरिषदः विभिन्नेषु वार्ड-क्षेत्रेषु निर्वाचनं लध्यन्तौ अजयः चन्द्ररेखा च स्व-स्व स्तरतः मतदातृभ्यः समर्थनं याचितवन्तौ आसन्। मतगणनानन्तरं घोषितेषु परिणामेषु चन्द्ररेखया स्वप्रतिद्वन्द्विनं पराजित्य विजयः प्राप्तः, परन्तु अजयाय अपेक्षितं समर्थनं न प्राप्तं तस्मै च पराजयः सोढव्यः अभवत्।

# निर्वाचन- चिह्न- आबंटने शिथिलता-कारणात् उपायुक्तेन 'एआरओ' (ARO) निलम्बितः



**हिमसंस्कृतवार्ताः- शिमला।**जिला- निर्वाचन- अधिकारी (पञ्चायतः), उपायुक्त- शिमला अनुपम कश्यपः (IAS) पञ्चायत- निर्वाचन- प्रक्रियायां गम्भीराम् उपेक्षां (शिथिलतां) विचिन्त्य सहायक-निर्वाचन- अधिकारिणं रजनीश चौहानं तत्कालप्रभावेण निलम्बितवान्। एषा कार्यविधिः रोहड़ू- विकास- खण्डे ग्रामपञ्चायत- दलगांव इत्यत्र निर्वाचन- चिह्नानां आबंटने नियमानाम् अवहेलनां दृष्ट्वा कृता अस्ति। प्राप्त- सूचनानुसारं रजनीश चौहानः, यः राजकीय-औद्योगिक-प्रशिक्षण-संस्थाने समरकोट (तहसील रोहड़ू) इत्यत्र 'ग्रुप इंस्ट्रक्टर' (समूह- प्रशिक्षकः) पदे कार्यरतः अस्ति, सः आदेश- सङ्ख्या आरबी/पञ्चायत इलेक्शन/२०२६-३५०७ दिनाङ्क ०६ मई २०२६ इत्यस्य अन्तर्गतं ग्रामपञ्चायत- दलगांव कृते सहायक-निर्वाचन- अधिकारी नियुक्तः आसीत्। पञ्चायत-निर्वाचन- प्रक्रियायाः अन्तर्गतं नाम-प्रत्याकर्षणस्य (नाम वापसी) अन्तिमां तिथिं पश्चात् १५ मई २०२६ दिनाङ्के निर्वाचनं लद्यद्भ्यः प्रत्याशिभ्यः निर्वाचन-चिह्नानाम् आबंटनस्य दायित्वं सम्बद्धस्य अधिकारिणः आसीत्। अन्वेषणकाले एतत् प्राप्तं यत् निर्वाचन-चिह्नानाम् आबंटनं राज्य- निर्वाचन- आयोगेन निर्गतानां दिशा- निर्देशानाम् अनुरूपं न अभवत्। आदेशेषु उल्लेखः अस्ति यत् चिह्नानाम् आबंटनं हिन्दी-वर्णमाला- क्रमानुसारेण, राज्य- निर्वाचन- आयोगेन अधिसूचित-क्रमसङ्ख्यायाः आधारेण करणीयम् आसीत्। एषा प्रक्रिया हिमाचलप्रदेश- पञ्चायतीराज- (निर्वाचन)- नियम, १९९४ इत्यस्य नियम-४२ अन्तर्गतं विहिता वर्तते।

सहायक- निर्वाचन- अधिकारिणा आबंटन- प्रक्रियायां निर्दिष्टाः नियमाः न पालिताः, चिह्नानां वितरणं च प्रावधानानां विपरीतं कृतम्। जनपद- प्रशासनेन एतत् निर्वाचन-प्रक्रियायां गम्भीरा प्रक्रियागता त्रुटिः तथा कर्तव्ये घोर-उपेक्षा मन्यते। आदेशे स्पष्टीकृतं यत् अस्याः प्रवृत्तेः कारणात् निर्वाचन- प्रक्रियायाः सुचारुसञ्चालने बाधा उत्पन्ना, प्रशासनिक-व्यवस्था च प्रभाविता अभवत्।उल्लेखनीयं वर्तते यत् पञ्चायत-निर्वाचन- कर्तव्यकालस्य समये सम्बद्धः अधिकारी हिमाचलप्रदेश- पञ्चायतीराज-अधिनियम, १९९४ इत्यस्य धारा १६०-ई अन्तर्गतं राज्य- निर्वाचन-आयोगस्य अधीने प्रतिनियुक्तौ कार्यं करोति स्म। एवं सति निर्वाचन-कार्येषु कस्यापि प्रकारस्य उपेक्षा गम्भीरा अनुशासनहीनता मन्यते। क्रमशः... ५ पृष्ठे

# भक्तिः गौरीशः च संस्कृतविषये शतप्रतिशतम् अङ्कान् प्राप्तवन्तौ



**हिमसंस्कृतवार्ता।** विद्यायाः क्षेत्रे अद्य कुरुक्षेत्रस्य वसुन्धरा पुनः एकदा गौरवान्विता अभवत्। गीता निकेतन आवासीय विद्यालयस्य मेधाविनौ छात्रौ भक्तिः तथा गौरीशः द्वादश-कक्षायाः परीक्षायां संस्कृतविषये शतप्रतिशतम् अङ्कान् प्राप्य सर्वान् चकितं कृतवन्तौ। एषा सफलता न केवलं तयोः परिश्रमस्य फलं वर्तते, अपितु संस्कृतभाषायाः सरलतां वैज्ञानिकतां च अपि प्रकटयति।

परीक्षा-परिणामस्य घोषणानन्तरं विद्यालये उत्सवस्य वातावरणं निर्मितम् अस्ति। भक्तिः स्वानुभवं श्रावयन्ती अवदत् यत् सा नित्यम् अभ्यासेन आत्मसात् कृतवती, येन परीक्षायां एकस्यापि अङ्कस्य न्यूनता न अभवत्। तथैव गौरीशः अपि संस्कृतं जीवनस्य आधारं मत्वा अतीव एकाग्रतया अध्ययनं कृतवान्। तस्य मते यदि श्रद्धा भवति तर्हि संस्कृतं जगतः सरला भाषा सिध्यति।अस्मिन् महति उपलक्ष्ये प्राचार्यमहोदयः उक्तवान् यत् अस्माकं विद्यालये द्वादशकक्षायां 17 छात्राः संस्कृतम् पठितवन्तः,तेषु 13 छात्राः 90 तः अधिकान् अङ्कान् प्राप्तवन्तः। असौ तेषां सर्वेषां छात्राणां कृते उज्ज्वल-भविष्याय मङ्गलकामनाः अवदत्।







# संस्कृतं मधुरं सदा- ३९

मासोऽयं पुरोषोत्तममासः इति नाम्ना प्रसिद्धोऽयम्। अस्मिन् २०८३ तमे सम्वत्सरे ज्येष्ठमासः अधिकमासत्वेन परिगणितोऽस्ति। अस्मिन् पुरुषोत्तममासे विहितं विष्ण्वर्चनं, नामसङ्कीर्तनं, व्रताचरणं, भागवतपाठः इत्यादिकं पुण्यकार्यम् अत्यन्तं शुभफलप्रदायकमस्तीति शास्त्रसम्मतम्। विशेषतः निर्धनेभ्यः, बुभुक्षुभ्यः वा विहितं खाद्यान्नदानम् अक्षयफलप्रदायकं भवति, इत्यत्र न शङ्का। खाद्यान्नदानस्य महत्त्वविषये लेखेऽस्मिन् उपस्थापयितुं प्रयत्यते। अन्नदानं सर्वेषु दानेषु श्रेष्ठम्, यतोहि तस्य फलं तत्काले हि प्राप्यते। तृप्तिदायकमेतत्, अन्यच्च, मनःप्रियप्रदम्, बलबुद्धिप्रदायकञ्च। अन्नदानेन मनुष्यः परमगतिं प्राप्नुयात्, लोकलोकान्तरे च सुखम् अधिगच्छेत्। अन्नदानेन सह जलदानमपि सर्वेषां तृप्तिकारकं स्यात्, अतः जलदानस्य महत्वम् असाधारणम्। भौतिकजगति सर्वेषु जीवनीयेषु पदार्थेषु अन्नजलादीनां सर्वाधिकं महत्त्वमस्ति, अत्यावश्यकञ्च भवति। पृथिव्याः वास्तविकं रत्नं तु एतदेव। उक्तमस्ति- 'पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्' इति। अतः सर्वैरपि सक्षमैः मानवैः एतत्रयस्य अवश्यं दानं कर्तव्यम्। अनेन दानेन न केवलं मनुष्याः हि, अपितु देवः, असुरः, यक्षः, किन्नरः, नागः, पितृगणः, गन्धर्वः, पशुः, पक्षी, कीटः, पतङ्गः, वृक्षः, लता, वनस्पतिः इत्यादयः सर्वे संतृप्ताः भवेयुः, यतोहि समस्तसृष्टिर्हि दानशीला वर्तते।

**उपनिषत्सु प्राप्यते-**

*'अन्नं वै प्रजापतिः।', 'अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्ति।' 'अन्नाद्वै प्रजाः प्रजायन्ते। याः काश्च पृथिवीं श्रिताः।'*

यथाशक्यं स्वकल्याणाय अन्नस्य वितरणं कार्यम्। अन्यथा दोषः बाधते। वेदे उक्तमस्ति- 'मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत् स तस्य। केवलाघो भवति केवलादी।'

भागवते- ***'यावद् भ्रियेत जठरं तावत्सत्वं हि देहिनाम्।***
***अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति।।'***

इति, शुभम्।



## स्वीडन देशेन प्रधानमन्त्री मोदी महोदयः 'रॉयल ऑर्डर ऑफ पोलर स्टार कमांडर ग्रैंड क्रॉस' सम्मानेन अलङ्कृतः

स्वीडन देशेन भारतस्य प्रधानमन्त्री नरेन्द्र मोदी महोदयः 'रॉयल ऑर्डर ऑफ पोलर स्टार कमांडर ग्रैंड क्रॉस' इत्यनेन सम्मानेन विभूषितः।स्वीडन देशस्य 'रॉयल ऑर्डर ऑफ पोलर स्टार, कमांडर ग्रैंड क्रॉस' इति सम्मानः कस्यापि राष्ट्रप्रमुखाय (राष्ट्राध्यक्षाय) प्रदीयमानः सर्वोच्चः सम्मानः अस्ति।प्रधानमन्त्रिणे नरेन्द्र मोदी महोदयाय प्राप्तः अयं ३१ तमः वैश्विकः सम्मानः अस्ति।

क्रमशः... उपायुक्तेन जिला- निर्वाचन- अधिकारिणा च अनुपम कश्यपेन उक्तं यत् हिमाचलप्रदेश- पञ्चायतीराज- अधिनियम, १९९४ इत्यस्य धारा १६०, भारतीय- संविधानस्य अनुच्छेद २४३-K, सीएससी (सीसीए) नियम, १९६५ इत्यस्य नियम- १०, राज्य- निर्वाचन-आयोगेन प्रदत्तानां शक्तीनां प्रयोगं कुर्वता रजनीश चौहानं सद्यः प्रभावतः निलम्बितुम् आदेशाः निर्गताः।

आदेशानुसारं निलम्बन- कालखण्डे रजनीश चौहानस्य मुख्यालयः 'खण्ड- विकास- अधिकारी- कार्यालयः', रोहड़ू निश्चितः कृतः। प्रशासनेन स्पष्टीकृतं यत् पञ्चायत-निर्वाचन-प्रक्रियां निष्पक्षां, पारदर्शिनीं, नियमबद्धां च रूपेण सम्पन्नं कारयितुं कस्यापि प्रकारस्य शिथिलता न सहिष्यते, भविष्ये अपि ईदृशेशु प्रकरणेषु कठोरा कार्यवाही प्रचरिष्यति।

## निर्वाचन-कार्यार्थं नियुक्तानि वाहनानि न प्रदत्तानि चेत् सम्बद्ध-विभागेषु भविष्यति कठोरा कार्यविधिः

जिला-निर्वाचन-अधिकारिणा उक्तं यत् निर्वाचनेषु विविधानां विभागानां वाहनानि निर्वाचन-कार्ये नियुक्तानि सन्ति, किन्तु केचन विभागाः वाहनानि न प्रेषयन्ति। ईदृशानां विभागानां विरुद्धम् अपि कार्यविधिः भविष्यति। हिमाचलप्रदेश- पञ्चायतीराज- अधिनियम, १९९४ तथा राज्य- निर्वाचन- आयोगस्य निर्देशानुसारं निर्वाचनकार्यम् अत्यावश्यकं राजकीयकार्यं मन्यते। अतः सम्बद्ध- विभागेभ्यः स्वकीयानि वाहनानि चालकाः च उपलब्धाः करणीयाः भवन्ति। तेन उक्तं यत् निर्वाचन- प्रक्रियां निष्पक्षां कारयितुं कोऽपि प्रमादः स्वीकार्यः न भविष्यति। निर्वाचन-कर्तव्ये नियुक्तानां कर्मचारिणां दिशा-निर्देशानुसारमेव कार्यं करणीयम्।

# विनोदकणिका

{१} **"पत्न्याः परिभाषा"**

या महिला स्वपतितः ५००० (पञ्चसहस्राणि) रूप्यकाणि ग्रहीत्वा तं ६००० (षड्सहस्राणि) आयव्ययलेखः दर्शयित्वा २००० (द्विसहस्राणि) रूप्यकाणि स्वसमीपे रक्षति सा पत्नी इति उच्यते/ कथ्यते।

🤗🤦😂

{२} जनः- Google प्रति- मम भार्यां दूरवाणीं कृत्वा वदतु अद्य अहं गृहं विलम्बेन प्रत्यागमिष्यामि, रात्र्याः भोजनार्थं किमपि स्वादिष्टं पचतु इति।

Google- आम् महोदयः।

किञ्चित्कालानन्तरम्- अग्रिमे समये भवन्तः स्वयमेव स्वपत्न्या सह वार्तालापं करोतु। तव भार्यायाः एतावत् कः श्रोष्यति??

😀👫🤷🙄

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**



**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमो नमः नन्दिनि। अद्य प्रथमं कामरूप- प्रदेशस्य वार्ता श्रूयताम्। तत्र एकेन आचार्येण पट्टकीट-कोशानां नूतनः प्रयोगः कृतः। तेन न केवलं तन्तुः निर्मितः अपितु अन्यानि वस्तूनि अपि निर्मितानि।

**नन्दिनी-** कोशानाम् उपयोगः तु बुद्धिमत्तायाः लक्षणम्। नव-मुम्बादेवी-नगरस्य वार्ता अपि रमणीया अस्ति। तत्र जलस्थानेषु सहस्रशः बलाकाः दृष्टाः। तैः सर्वं क्षेत्रं पाटल-वर्णीकृतम्।

**काव्या-** खगानां सा शोभा तु मनोहरा। किन्तु मनुष्याणां व्यवहारः कदाचित् अतीव विचित्रः भवति। एकेन नियोजकेन कश्चन प्रार्थी निराकृतः यतः तस्य पूर्वतनं कार्यालयं केवलं षट्शत- मीटर मिते दूरे आसीत्। अत्र नियोजकेन विचित्रः तर्कः कृतः।

**नन्दिनी-** तादृशः निर्णयः तु उपहासास्पदः एव। तथापि अन्ते एका करुणापूर्णा वार्ता अस्ति। कच्छ- प्रदेशे राजकुमारी-नाम्ना महिलया मरुभूमौ स्थिताः असहायकाः शुनकाः रक्षिताः। सङ्कटकाले तैः शुनकैः रक्षणं प्राप्तम् अस्ति।